# Shri Ganapati Stotram

# શ્રીગણપતિસ્તોત્રમ્ ૮

## Document Information

Text title : Shri Ganapati Stotram 8

File name : gaNapatistotram8.itx

Category : ganesha, svAminArAyaNa, aShTaka

Location : doc_ganesha

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# શ્રીગણપતિસ્તોત્રમ્૮

વિઘ્નેશ ! વિઘ્નચયખણ્ડનનામધેય !
શ્રી શઙ્કરાત્મજ ! સુરાધિપવન્દ્યપાદ ।
દુર્ગામહાવ્રતફલાખિલમઙ્ગલાત્મન્ !
વિઘ્નં મમાપહર સિદ્ધિવિનાયક! ત્વમ્ ॥ ૧॥

સત્પદ્મરાગ મણિવર્ણ શરીરકાન્તિઃ ।
શ્રી સિદ્ધિબુદ્ધિપરિર્ચિચિન્તકુઙ્કુમશ્રીઃ
દક્ષસ્તને વલયિતાતિમનોજ્ઞશુણ્ડો !
વિઘ્નં મમાપહર સિદ્ધિવિનાયક! ત્વમ્ ॥ ૨॥

પાશાઙ્કુશાબ્જપરશૂંશ્ચ દધચ્ચતુર્ભિ-
ર્દોર્ભિશ્ચ શોણકુસુમસ્રગુમાઙ્ગજાતઃ ।
સિન્દુરશોભિતલલાટ વિધુપ્રકાશો
વિઘ્નં મમાપહર સિદ્ધિવિનાયક! ત્વમ્ ॥ ૩॥

કાર્યેષુ વિઘ્નચયભીતવિરઞ્ચિમુખ્યૈઃ
સમ્પૂજીતઃ સુરવરૈરપિ મોદકાદ્યૈઃ ।
સર્વેષુ ચ પ્રથમમેવ સુરેષુ પૂજયો !
વિઘ્નં મમાપહર સિદ્ધિવિનાયક! ત્વમ્ ॥ ૪॥

શીઘ્રાઞ્ચનસ્ખલનચુઞ્ચુરવોર્ધ્વકણ્ઠ
સ્થૂલોન્દુરુદ્રવણહાસિતદેવસઙ્ઘઃ ।
શૂર્પશ્રુતિશ્ચ પૃથુવર્તુલતુઙ્ગતુન્દો !
વિઘ્નં મમાપહર સિદ્ધિવિનાયક! ત્વમ્ ॥ ૫॥

યજ્ઞોપવિતપદલમ્ભિતનાગરાજો
માસાદિપૂણ્યદદૃશીકૃતઋક્ષરાજઃ ।
ભક્તાભયપ્રદ ! દયાલય ! વિઘ્નરાજો !
વિઘ્નં મમાપહર સિદ્ધિવિનાયક! ત્વમ્ ॥ ૬॥

સદ્રત્નસારતતિરાજિતસત્કિરીટઃ
કૌસુમ્ભચારુવસનદ્વય ઊર્જિતશ્રીઃ ।
સર્વત્રમઙ્ગલકરસ્મરણપ્રતાપો
વિઘ્નં મમાપહર સિદ્ધિવિનાયક! ત્વમ્ ॥ ૭॥

દેવાન્તકાદ્યસુરભીતસુરાર્તિહર્તા
વિજ્ઞાનબોધનવ તમોપહર્તા ।
આનન્દિતત્રિભુવનેશ ! કુમારબન્ધો !
વિઘ્નં મમાપહર સિદ્ધિવિનાયક! ત્વમ્ ॥ ૮॥

ઇતિ શ્રીગણપતિસ્તોત્રં સમ્પુર્ણમ્ ।

*Shri Ganapati Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*